श्री षण्मुख भुजंग स्तुतिः

श्री षण्मुख भुजंग स्तुतिः

ह्रिया लक्ष्म्या वल्ल्या सुरपृतनयाऽऽलिंगिततनुः
मयूरारूढोऽयं शिववदनपंकेरुहरविः |
षडास्यो भक्तानामचलहृदिवासं प्रतनवै
इतीमं बुद्धिं द्रागचलनिलयः संजनयति || 1 ||

स्मितन्यक्कृतेंदुप्रभाकुंदपुष्पं
सिताभ्रागरुप्रष्ठगंधानुलिप्तं |
श्रिताशेषलोकेष्टदानामरद्रुं
सदा षण्मुखं भावये हृत्सरोजे || 2 ||

शरीरेंद्रियादावहंभावजातान्
षडूर्मीर्विकारांश्च शत्रून्निहंतुं |
नतानां दधे यस्तमास्याब्जषट्कं
सदा षण्मुखं भावये हृत्सरोजे || 3 ||

अपर्णाख्यवल्लीसमाश्लेषयोगात्
पुरा स्थाणुतो योऽजनिष्टामरार्थं |
विशाखं नगे वल्लिकाऽऽलिंगितं तं
सदा षण्मुखं भावये हृत्सरोजे || 4 ||

गुकारेण वाच्यं तमो बाह्यमंतः
स्वदेहाभया ज्ञानदानेन हंति |
य एनं गुहं वेदशीर्षैकमेयं
सदा षण्मुखं भावये हृत्सरोजे || 5 ||

यतः कर्ममार्गो भुवि ख्यापितस्तं
स्वनृत्ये निमित्तस्य हेतुं विदित्वा |
वहत्यादरान्मेघनादानुलासी
सदा षण्मुखं भावये हृत्सरोजे || 6 ||

कृपावारिराशिर्नृणामास्तिकत्वं
दृढं कर्तुमद्यापि यः कुक्कुटादीन् |
भृशं पाचितान् जीवयन्राजते तं
सदा षण्मुखं भावये हृत्सरोजे || 7 ||

भुजंगप्रयातेन वृत्तेन क्लुप्तां
स्तुतिं षण्मुखस्यादराद्ये पठंति |
सुपुत्रायुरारोग्यसंपद्विशिष्टान्
करोत्येव तान् षण्मुखः सद्विदग्र्यान् || 8 ||

इति श्रीशृंगेरि शारदापीठ जगद्गुरु श्रीचंद्रशेखरभारती स्वामिभिः विरचितं श्रीषण्मुख भुजंग स्तुतिः |